सालुवकवच

नं. ९४९१ क

गौ	री	व	ल्ल	भ	का
[illegible]	प	द	म्मो	ये	मु
[illegible]	[illegible]	मा	क्रौं	[illegible]	[illegible]
[illegible]	[illegible]	मदि	रं	[illegible]	श्री
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	२	[illegible]	[illegible]	२	श्री

गौरीवल्लभेतिमंत्रस्य वामदेवऋषिरनुष्टुप्छंदः
सदाशिवोदेवताममाभीष्टसिद्ध्यर्थेजपेविनियोगः

सालु कवच

१ ॐ श्रीगणेशाय नमः १ ॐ ऐं क्लीं श्रीं नमो भगवते श्रीशिवा
य मम शरीरे ज्वल २ प्रज्वल २ साधय साधय २ रक्ष २ सर्व
दुष्टेभ्यो हुं फट् स्वाहा श्रीशिवशरीरतः पातु गौरीवल्लभका
मारिः कालकूटविषादनः मामुद्धरापदम्भोधेस्त्रिपुरघ्ना
यकान्तकः १ ॐ ऐं० मायाधीशाय मम पृष्ठे ज्वल २०
मायाधीशस्तु पृष्ठतः पातु गौरीवल्लभेत्यादि २ ॐ ऐं० पि
नाकिने मम दक्षिणे ज्वल २० पिनाकि दक्षिणे पातु गौ० ३
ॐ ऐं० महेश्वराय मम वामपार्श्वे ज्वल २० वामपार्श्वे महे
श्वरः। पातु गौरी० ४। ॐ ऐं० शम्भवे मम शिखाग्रे ज्वल २०
शिखाग्रे पातु मे शम्भुः गौरी० ॐ ऐं० शंकराय मम लला
टे ज्वल २० ललाटं पातु शंकरः गौरी० ॐ ऐं० ईश्वराय मम
वदने ज्वल २० ईश्वरो वदने पातु गौरी० ॐ ऐं० पुरान्तका
य मम भ्रुवोर्मध्ये ज्वल २० भ्रुवोर्मध्ये पुरान्तकः पातु
गौ० ॐ ऐं० स्थाणवे मम भ्रुवोर्ज्वल २० भ्रुवौ पातु मम
स्थाणुः गौ० ॐ ऐं० कपर्दिने मम लोचनयोर्ज्वल २०
कपर्दी पातु लोचने गौ० ॐ ऐं० शर्वाय मम श्रोत्रयोर्ज्वल २०
शर्वो मे श्रोत्रयोः पातु गौ० ॥ ॐ ऐं० वागीशाय मम लम्बि
यां ज्वल २०। वागीशः पातु लम्बिकां गौ० ॐ ऐं० वृषवाह
नाय मम नाशयोर्ज्वल २० नाशयोर्मे वृषवाहनः पातु
गौ० ॐ ऐं० वृषभध्वजाय मम नाग्रे ज्वल २० नाशाग्रं वृष
भध्वजः पातु गौ० ॐ ऐं० स्मरारये मम तालुनि ज्वल २०
स्मरारिः पातु मे तालु गौ० ॐ ऐं० भक्तवत्सलाय मम
ओष्ठयोर्ज्वल २० ओष्ठयोर्भक्तवत्सलः पातु गौ० ॐ
ऐं० सर्वविद्याप्रदायकाय मम जिह्वायां ज्वल २० जि
ह्वां मम सदा पातु सर्वविद्याप्रदायकः गौ० ॐ ऐं० मृत्यु
ञ्जयाय मम दन्तेषु ज्वल २०। पातु मृत्युञ्जयो दन्तान् गौ०
ॐ ऐं० भूतराजे मम चिबुके ज्वल २० चिबुकं पातु भूतरा

ट गो० ॐ ऐं० परमेशाय मम कपोलयोर्ज्वल २०। परमेशः
कपोलौ मे पातु गो० ॐ ऐं० कपालभृते मम त्रिके ज्वल २०।
त्रिकं पातु कपालभृत् गो० ॐ ऐं० पशुपतये मम कंठे ज्वल २०।
पीठं पशुपतिः पातु गो० ॐ ऐं० शूलिने मम हन्वोर्ज्वल २।०
शूली पातु हनू मम गो० ॐ ऐं० हराय मम स्कंधहृदये ज्वल २।०
स्कंधहृदयं हरः पातु गो० ॐ ऐं० धूर्जटये मम भुजयोर्ज्वल २।०
धूर्जटिः पातु मे भुजौ गो० ॐ ऐं० महादेवाय मम भुजसंध्योर्ज्वल २।०
भुजसंधिं महादेवः पातु गो० ॐ ऐं० ईशानाय मम प्रकूर्परे ज्व
ल २।० ईशानो मे प्रकूर्परे पातु गो० ॐ ऐं० जगन्नाथाय मम
मध्यसंध्योर्ज्वल २।० मध्यसंधिं जगन्नाथः पातु गो० ॐ ऐं०
चन्द्रशेखराय मम प्रकोष्ठे ज्वल २।० प्रकोष्ठं चन्द्रशेखरः पा
तु गो० ॐ ऐं० त्रिनेत्राय मम मणिबन्धयोर्ज्वल २।० मणि
बन्धौ त्रिनेत्रो मे पातु गो० ॐ ऐं० भीमाय मम करतले ज्वल २।०
भीमः पातु करतले गो० ॐ ऐं० रुद्राय मम करपृष्ठे ज्वल २।०
करपृष्ठं रुद्र पातु गो० ॐ ऐं० हद्राय ममाङ्गुष्ठहृदये ज्वल २।०
हद्रोऽङ्गुष्ठहृदयं मम गो० ॐ ऐं० उमासहायाय मम तर्जन्यो
र्ज्वल २।० उमासहायस्तर्जन्यौ पातु गो० ॐ ऐं० भर्गाय म
म मध्यमयोर्ज्वल २।० भर्गो मे पातु मध्यमे गो० ॐ ऐं० क
रालास्याय मानामिकयोर्ज्वल २।० अनामिके करालास्यः
पातु गो० ॐ ऐं० कालकंठाय मम कनिष्ठकयोर्ज्वल २।०
कालकंठः कनिष्ठके पातु गो० ॐ ऐं० गङ्गाधराय ममाङ्गु
लीपर्वणोर्ज्वल २।० गङ्गाधरोऽङ्गुलीपर्वणि पातु गो०
ॐ ऐं० अप्रमेयाय मम नखेषु ज्वल २।० अप्रमेयो मम नखा
नि मे पातु गो० ॐ ऐं० नसुरूपाय मम वक्षसि ज्वल २।० व
क्षस्थलं सुरूपः पातु गो० ॐ ऐं० दक्षाध्वरान्तकाय मम कक्ष
योर्ज्वल २।० कक्षे दक्षाध्वरान्तकः पातु गो० ॐ ऐं० अघो
राय मम हृदये ज्वल २।० अघोरो हृदयं पातु गो० ॐ ऐं०
वामदेवाय मम स्तनद्वययोर्ज्वल २।० वामदेवः स्तनद्व
यं पातु गो० ॐ ऐं० भालदृशे मम जठरे ज्वल २०। भा

२ लहकूजठरंपातु गो० ॐपें० नारायणप्रियायममनाभौ
ज्वल २० नाभिंनारायणप्रियःपातु गो० ॐपें० प्रजाकराय
ममकुक्षौज्वल २० कुक्षौप्रजाकरःपातु गो० ॐपें० महाव
लायममकुक्षिपार्श्वयोर्ज्वल २० कुक्षिपार्श्वेमहावलःपातु
2 गो० ॐपें० सद्योजातायममकटौज्वल २० सद्योजातःकटिंपा
तु गो० ॐपें० भैरवायममपृष्ठभागेज्वल २० पृष्ठभागंतुभै
रवःपातु गो० ॐपें० मोहनायममजघनयोर्ज्वल २० मोह
नोजघनपातु गो० ॐपें० जितेन्द्रियायममगुदेज्वल २०
गुदंममजितेन्द्रियःपातु गो० ॐपें० ऊर्ध्वरेतसेममलिंग
देशेज्वल २० ऊर्ध्वरेतालिंगदेशंपातु गो० ॐपें० विश्व
मोहनायममवृषणयोर्ज्वल २० वृषणंविश्वमोहनंपातु
गो० ॐपें० भवायममऊरुयुग्मेज्वल २० ऊरुयुग्मंभवः
पातु गो० ॐपें० भवान्तकायममजानुयुग्मेज्वल २० जा
नुयुग्मंभवान्तकःपातु गो० ॐपें० हुंकारायममजंघ
योर्ज्वल २० हुंकारःपातुमेजंघे गो० ॐपें० फट्कारायम
ममगुल्फयोर्ज्वल २० फट्कारोममगुल्फकेपातु गो०
ॐपें० वषट्कारायममपादपृष्ठेयोर्ज्वल २० वषट्कारःपाद
पृष्ठेपातु गो० ॐपें० वौषट्कारायममांघ्रितलेज्वल २०
वौषट्कारोंघ्रितलेपातु गो० ॐपें० स्वाहाकारायममां
गुलीपार्श्वेज्वल २० स्वाहाकारोंगुलीपार्श्वेपातु गो० ॐपें०
स्वधाकारायममांगुलीषुज्वल २० स्वधाकारोंगुलीर्ममपा
तु गो० ॐपें० त्वरितायममसर्वसंधिषुज्वल २० त्वरितः
सर्वसंधिस्मेपातु गो० ॐपें० नृसिंहजितेममरोमकूपे
षुज्वल २० रोमकूपान्नृसिंहजित्पातु गो० ॐपें० म
नोवेगायममत्वचिज्वल २० त्वचंपातुमनोवेगः गो०
ॐपें० कालजितेममरुधिरेज्वल २० कालजिद्रुधिरं
ममपातु गो० ॐपें० पुष्टिदायमममांसेज्वल २० पु
ष्टिदःपातुमेमांसं गो० ॐपें० स्वस्तिदायमममेदसि
ज्वल २० मेदोमेस्वस्तिदोऽवतु गो० ॐपें० सर्वात्म

नेममास्थिचयेज्वल २।० सर्वात्मास्थिचयंपातु गौ० ॐपं०
जगत्प्रभवेममसज्जनिज्वल २।० मज्जांममजगत्प्रभुःपातु गौ०
ॐपं० हृद्धिकरायममशुक्रेज्वल २० शुक्रंहृद्धिकरःपातु गौ०
ॐपं० वाचामधीश्वरायममवृद्धौज्वल २।० वृद्धिंवाचामधीश्वरः
पातु गौ० ॐपं० प्रारम्भेश्वरायमममूलाधाराम्बुजेज्वल २।०
मूलाधाराम्बुजेपातुभगवान्प्रारम्भेश्वरः गौ० ॐपं० अजाय
ममस्वाधिष्ठानेज्वल २।० स्वाधिष्ठानमजःपातु गौ० ॐपं०
अजहरिप्रियममममणिपूरेज्वल २।० मणिपूरंहरिप्रियःपा
तु गौ० ॐपं० सालवेणायममानाहतेज्वल २।० अनाहतंसा
लवेणःपातु गौ० ॐपं० जीवनायकायममविशुद्धेज्वल २।०
विशुद्धंजीवनायकःपातु गौ० ॐपं० सर्वज्ञानप्रदायममाज्ञे
ज्वल २।० सर्वज्ञानप्रदोस्याज्ञांपातु गौ० ॐपं० सदाशिवाय
ममललाटेज्वल २०। ललाटेमेसदाशिवःपातु गौ० ॐपं०
महादेवायममब्रह्मरंध्रेज्वल २।० ब्रह्मरंध्रंमहादेवःपातु
गौ० ॐपं० पक्षिराजायममाखिलात्मनिज्वल २।० पक्षि
राजोऽखिलात्मवान्पातु गौ० ॐपं० सर्वलोकवशीका
रायपरवर्गजितेमयिज्वल २।० सर्वरोगवशीकारःपातु
मांपरवर्गजित् गौ० ॐपं० वज्रमुष्टिवराभीतिहस्ताय
कालाभ्रसन्निभायविजयासहितायाऽग्निजितेममपू
र्वस्यांदिशिज्वल २० वज्रमुष्टिवराभीतिहस्तःकालाभ्र
सन्निभः विजयासहितःपातुचैन्द्रीककुभमग्निजित् गौ०
ॐपं० शक्तिशूलकपालासिहस्तायसौदामिनीप्रभायज
यायुतायमहाभीमायममआग्नेय्यांदिशिज्वल २।० शक्ति
शूलकपालासिहस्तःसौदामिनीप्रभः जयायुतोमहाभी
मःपातुवैश्वानरींदिशम् गौ० ॐपं० दण्डासिमुसलह
लपाशाङ्कुशाकराम्बुजाययमान्तकायअजितायुक्ताय
ममया म्यांदिशिज्वल २० दण्डासिमुसलहलपाशा
ङ्कुशाकराम्बुजः यमान्तकोजितायुक्तोयामींपातुदिशंम
म गौ० ॐपं० खड्गखेटाग्निपरशुहस्तायशत्रुविमर्दना

३ यअपराजितयायुक्तायममनैरृत्यांदिशिज्वल २।० खड्ग
खेटाग्निपरशुहस्तः शत्रुविमर्द्दनः अपराजितयायुक्तः सदाव्या
न्नैरृतींदिशम् गो० ॐपं० पाशाङ्कुशधनुर्बाणपाणयेघोरा
युतायग्रहायहरिद्राभायआत्मजितेममवारुण्यांदिशिज्व
ल २।० पाशाङ्कुशधनुर्बाणपाणिर्घोरायुतोग्रहः हरिद्राभो
निशंपायाद्वारुणींदिशमात्मजित् गो० ॐपं० ध्वजोग्रक्र
कचोदारभुजायदुर्गायुतायखगायचण्डवेगायशिवायम
ममारुत्यांदिशिज्वल २।० ध्वजोग्रक्रकचोदारभुजोदुर्गायु
तः खगः चण्डवेगः शिवः पायात्सततमारुतींदिशम् गो०
ॐपं० गदाब्जखगवराभीतिकराम्भोजायश्रियायुतायक
नकाभायमहातेजसेममकौबेर्यांदिशिज्वल २।० गदा
ब्जखगवराभीतिकराम्भोजः श्रियायुतः कनकाभोमहातेजाः
पातुकौबेरींदिशम् गो० ॐपं० त्रिशूलाहिकपालाग्नि
दोस्तलायविद्ययायुतायभस्मोद्धूलितसर्वाङ्गायअपरा
जितायममशैव्यांदिशिज्वल २।० त्रिशूलाहिकपालाग्नि
दोस्तलोविद्ययायुतः भस्मोद्धूलितसर्वाङ्गः शैवींपात्वप
राजितः गो० ॐपं० जपास्रक्पुस्तकाम्भोजायकमण्ड
लुकराम्बुजायगिरायुक्तायसर्वभूतहितेरतायममोर्द्ध
ज्वल २।० जपास्रक्पुस्तकाम्भोजकमण्डलुकराम्बुजः
ऊर्द्धंपातुगिरायुक्तः सर्वभूतहितेरतः गो० ॐपं० शंखच
क्रगदाभीतिहस्तायपद्मायुतायअव्ययायकालाञ्जनस
मायनिलायअनारतायममपातालेज्वल २।० शंखच
क्रगदाभीतिहस्तः पद्मायुतोव्ययः कालाञ्जनसमोनिलः
पातालेपात्वनारतम् गो० ॐपं० नरसिंहजिते२साल्ववा
य१ममान्तकाविदिक्षुज्वल २।० अन्तकाविदिशः पातुसा
ल्ववोनरसिंहजित् गो० ॐपं० शरभायममसंग्रामेज्वल २।०
शरभः पातुसंग्रामे गो० ॐपं० वैरिकुलान्तकायममयु
द्धेज्वल २।० युद्धेवैरिकुलान्तकः पातु गो० ॐपं० सर्व
सौभाग्यदायममजाग्रत्स्वप्नसुषुप्तिषुज्वल २० सर्व

सौभाग्यदः पातु जायात्वममस्तुभिषु गौ० ॐ ऐं० सर्वसंप
त्प्रदायममधनधान्यादिकेज्वल २।० सर्वसंपत्प्रदः पातु धनधा
न्यादिकम्मम गौ० ॐ ऐं० संतानदायममसंतानेषुज्वल २।० संता
नदः सन्तान्पातु गौ० ॐ ऐं० मायुष्करायमम[illegible]षुज्वल २।०
दारानायुःकरोतिशं पातु गौ० ॐ ऐं० वृद्धिकरायममवन्धुषु
ज्वल २।० वन्धून्वृद्धिकरः पातु गौ० ॐ ऐं० सर्ववशङ्करायम
मगृहेज्वल २।० गृहं सर्ववशंकरः पातु गौ० ॐ ऐं० ग्रामेश्वरा
यममग्रामेज्वल २।० ग्रामंग्रामेश्वरः पातु गौ० ॐ ऐं० दिगंम्ब
रायममराज्येज्वल २।० राज्यं पातु दिगंम्बरः गौ० ॐ ऐं० शान्ति
करायममराष्ट्रेज्वल २।० राष्ट्रंशान्तिकरः पातु गौ० ॐ ऐं० धर्म
शासकायममेराजनिज्वल २।० राजानंधर्मशासकः पातु
गौ० ॐ ऐं० दुष्टहरायममममार्गेज्वल २।० मार्गंदुष्टहरः पातु
गौ० ॐ ऐं० भैरवायममधर्मकर्मसुज्वल २।० धर्मकर्माणि
भैरवः पातु गौ० ॐ ऐं० क्लीं ग्लीं नमो भगवते वटुकाय ममसर्वा
वस्थासुभयेषुचसर्वस्मिन्ज्वल २ प्रज्वल २ साध्यंसाधय २
रक्ष २ सर्वदुष्टेभ्यो हुं फट् स्वाहा वटुकः पातु मे सर्वाव
स्थासु भयेषु च गौरीवल्लभेत्यादि अतः परं ये ग्रामयातकारि
त्यादि पठेत् अस्य श्री वीक्षणसंश्लिष्टः प्राणरक्षामनोर्जपः १
प्राधानमूर्तिभावस्थ प्रासादे ह्याद्य सिद्धये साधकः प्रणव
त्वां नमो भगवते निच २ प्रतिनामवतुर्थ्यन्तस्पर्शमित्यभि
धीयते १ हिर्ज्वलप्रज्वलेसाध्यसाधयहिहिरक्षतत्स
र्वभूतेभ्यो हुं फट् च स्वाहान्तयत्नदीक्षणम् ४ ॥